दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-213 | 1 | मई 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लैकादशी
ज्येष्ठ 12 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलस्य सर्वकारीय-विद्यालयाः देशे सर्वश्रेष्ठत्वेन निर्मास्यन्ते : मुख्यमन्त्री सुक्खुः

3 चतुर्थबारं पेट्रोल-डीजलमूल्यवृद्धि-कारणात् जनजीवनं प्रभावितं जातम्

5 कुलाधिपतेः समक्षं राजभवने, पटनायां ललितनारायण-मिथिला-विश्वविद्यालयस्य कुलपतेः पीपीटी-प्रस्तुतिः प्रशंसनीया

## राष्ट्रपतिः द्रौपदीमुर्मुः नवदेहल्यां राष्ट्रपति-भवने पद्मपुरस्कारान् प्रदत्तवती



राष्ट्रपतिः द्रौपदीमुर्मुः राष्ट्रपतिभवने आयोजिते कार्यक्रमे पद्मपुरस्कारान् प्रदत्तवती। पद्म-पुरस्काराः देशस्य सर्वोच्च-नागरिक-पुरस्कारेषु अन्यतमाः सन्ति, यस्मिन् पद्मविभूषणः, पद्मभूषणः, पद्मश्रीः च अन्तर्भवन्ति । षड्विंशत्यधिक द्विसहस्रतमे वर्षे प्रथम-नागरिक-निवेश-समारोहे राष्ट्रपतिना कलाक्षेत्रे अभूतपूर्व-योगदानाय मरणोपरान्तं चलचित्र-अभिनेतारं धर्मेन्द्रसिंहदेओलं, वायलिन वादकं डॉ. एन. राजमवर्यं च पद्मविभूषणपुरस्कारौ, षट् पद्मभूषण पुरस्काराः, अष्टपञ्चाशत् पद्मश्री पुरस्कारैः सह षट्षष्ठी पद्मपुरस्काराः प्रदत्ताः। अवशिष्टाः पद्मपुरस्काराः पश्चात् नागरिक-निवेश-समारोहस्य द्वितीये चरणे प्रदीयन्ते। अस्मिन् वर्षे सर्वकारेण आहत्य एकत्रिंशोत्तरैकशत पद्मपुरस्काराणां घोषणा कृता अस्ति।

## सर्वकारः देशे पेट्रोलियम-उत्पादानां सुगमतया आपूर्ति सुनिश्चेतुं प्रयतमानः अस्ति - सुजाता शर्मा

सर्वकारः देशे पेट्रोलियम-उत्पादानां सुगमतया आपूर्ति सुनिश्चेतुं प्रयतमानः अस्ति। पश्चिम-एशियायाः वर्तमानस्थित्याम् नवदेहल्याम् अन्तर्मन्त्रालयी-संवादं सम्बोधयन्ती पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत् देशे एल. पी. जी. इत्यस्य शोधनागारस्य उत्पादनं प्रतिदिनं पञ्चाशत्-सहस्रटन्-परिमितं यावत् अस्ति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतीय-दूतावासः वाणिज्य-दूतावासः च भारतीय-प्रवासिनां कल्याणाय निरन्तरं सम्पर्करतौ स्तः सन्ति। श्री जायसवालः अवदत् यत् मन्त्रालयः गल्फ-क्षेत्रे बृहत् सङ्ख्यायां स्थितस्य समुद्रीय-समुदायस्य सर्वविध साहाय्यं प्रददाति। उर्वरकविभागस्य अपरसचिवा अपर्णा शर्मा इत्येषा अवदत् यत् देशे उर्वरकानां समग्र भण्डारस्य स्थितिः अपि सुखकरः एव अस्ति।

## सर्वोच्चन्यायालयेन नीट-परीक्षा-पत्र-लीक-प्रकरणे केन्द्रस्य, एन. टी. ए. सी. बी. आई. इत्युभाभ्यां प्रतिक्रिया याचिता

सर्वोच्चन्यायालयेन नीट-परीक्षा-पत्र-लीक-प्रकरणे केन्द्रस्य, एन. टी. ए. सी. बी. आई. इत्येतयोः च प्रतिक्रिया याचिता। सहैव प्रकरणेस्मिन् देहल्याः न्यायालयेन पुणे-नगरस्य भौतिकशास्त्रस्य आचार्यां मनीषा सञ्जय हवालदरं नीट-यू. जी. परीक्षा-पत्र लीक इति प्रकरणे केन्द्रीय अन्वेषण-संस्थायाः षड्दिनानाम् अभिरक्षायां प्रेषितम्। विशेषन्यायाधीशेन अजयगुप्ता वर्येण अभियुक्तया सह अभिरक्षायां प्रश्नोत्तरम् उद्दिश्य सी.बी.आई. इत्यस्य आवेदनं स्वीकृतम्। मनीषा इत्येषा मई मासस्य द्वाविंशति दिनाङ्के निगडिता आसीत्, ट्रान्सिट-रिमाण्ड इत्यनेन मध्यमेन न्यायालये च उपस्थापिता । सी.बी.आई. इत्यस्यानुसारं, नीट-यू. जी. परीक्षा-सामग्रीणां अनुवादिकारूपेण कार्यं कुर्वन्ती पुणे-नगरे सेठ-हीरालाल सराफ प्रशालया सह सम्बद्धा, अन्यैः अभियुक्तैः सह अनुवादार्थं भौतिकशास्त्रस्य प्रश्नान् प्रसारितवतीति आरोपः अस्ति।

## असम-सर्वकारेण राज्य-विधानसभायां समान-नागरिक-संहितायाः विधेयकं स्थापितम्

असम-सर्वकारेण राज्य-विधानसभायां समान-नागरिक-संहितायाः विधेयकं स्थापितम्। विधेयकं बहुविवाहं प्रतिषिद्धं, लिव-इन-सम्बन्धानां पञ्जीकरणम् अनिवार्यं कर्तुं च प्रयतते। विधेयकस्य व्यवस्था अस्ति यत् असम-राज्ये निवसतां अनुसूचितजनजातीनां कृते एतत् न प्रवर्तयिष्यति। विवाहार्थं, विधेयकं पुरुषाणां तथा महिलानां कृते क्रमशः एकविंशति-वर्षाणि अष्टादश-वर्षाणि च न्यूनतमं आयुः स्वीकरोति तथा च बहुविवाहं निषेधयति। विधिसम्मत-अधिकाराणां रक्षणार्थं, विधेयके विवाह पञ्जीकरणं विवाह-विच्छेद-पञ्जीकरणम् अनिवार्यं च कर्तुं प्रस्तावः अस्ति, यत् दम्पति कृते भरणपोषणस्य, उत्तराधिकारस्य, अन्यानां विधिसम्मत-संरक्षणस्य च सुरक्षायै महत्वपूर्णं भविष्यति। राज्यस्य मन्त्रिमण्डलस्य मन्त्री अतुल बोरा इत्येषः मुख्यमन्त्रिणः हिमान्ता-बिस्वा-सरमा इत्यस्य पक्षतः सदने समान नागरिक संहितायाः असम-विधेयकम् विंशति षड्विंशति इति प्रस्थापयत्। अनेनैव असम-राज्यं पूर्वोत्तरस्य प्रथमं, देशस्य तृतीयं च भाजपा-शासितं राज्यम् अभवत् यत् यू सी सी इति विधिं प्रावर्तयत्। भाजपेति दलं षड्विंशत्यधिक द्विसहस्रतमवर्षस्य विधानसभा निर्वाचनात् प्राक् असम-राज्ये स्वस्य घोषणापत्रे यू. सी. सी. विधेयकस्य प्रतिज्ञाम् अकरोत्। अस्मिनेव मासे त्रयोदश दिनाङ्के राज्यमन्त्रिमण्डलेन प्रथमसभायां विधेयकं स्वीकृतम्।

## अद्य क्वाड-विदेशमन्त्रिमण्डलस्य उपवेशनं नवदेहल्यां भविष्यति

क्वाड-विदेशमन्त्रिमण्डलस्य उपवेशनं नवदिल्ल्यां भविष्यति। आस्ट्रेलिया देशस्य विदेशमन्त्री पेनी वोङ्गः, जापान-देशस्य विदेशमन्त्री तोशिमित्सु मोटेगी, अमेरिकादेशस्य विदेशसचिवः मार्को रुबियो च अस्यां सभायां उपस्थिताः भविष्यन्ति। विदेशमन्त्री एस्. जयशङ्करः अस्य सम्मेलनस्य अध्यक्षः भविष्यति। विदेशमन्त्रालयः अवदत् यत्, नेतारः प्राधान्येषु क्षेत्रेषु क्वाड् सहयोगस्य प्रगतिविषये विचारान् विनिमयं करिष्यन्ति, वर्तमान-उपक्रमाणां प्रगतिम् अपि च परस्पर-चिन्ताविषयकान् अन्यान् अन्ताराष्ट्रिय-विषयान् समीक्षितुं शक्नुवन्ति। भारत-अमेरिका-आस्ट्रेलिया-जपान्-देशैः युक्तः क्वाड्-सङ्घः भारत-प्रशान्तप्रदेशे शान्त्यै, सुरक्षायै, स्थिरतायै च प्रमुखः समूहः उद्भूतः अस्ति। भारतं सङ्गटनस्य वर्तमानस्य अध्यक्षस्य रूपेण अस्याः सभायाः आतिथ्यं करोति।

## सुभाषितम्

**तुष्यन्ति भोजने विप्राः,**
**मयूराः घनगर्जिते।**
**साधवः परसम्पत्तौ,**
**खलाः परविपत्तिषु।।**

भावार्थः- पुरोहित भोजन कराए जाने से संतुष्ट होते हैं, मोर बादलों की गर्जना से प्रसन्न होते हैं। साधु तथा सज्जन व्यक्ति दूसरों की संपन्नता को देख कर संतुष्ट होते हैं जबकि दुष्ट और नीच व्यक्ति दूसरों को विपत्तिग्रस्त देख कर ही प्रसन्न होते हैं।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## डीज़ल-पेट्रोल-उत्पादशुल्कयोः न्यूनीकरणेन एकलक्षकोटि-रूप्यकाणां राजस्वस्य उपरि प्रभावः भविष्यति - वित्तमन्त्री सीतारमण।

वित्तमन्त्री-निर्मला-सीतारमण पश्चिम-एशिया-सङ्कटकालावधौ इन्धनस्य, उर्वरकस्य, विदेशी-मुद्रायाः च विषये अधिकं ध्यानं दातुम् आहूतवती, देशीय अर्थव्यवस्था निरन्तरं सुदृढा एवास्ति उक्तवती। मुम्बई-नगरे सिडबी-संस्थायाः सप्तत्रिंशत्तमे वार्षिकोत्सवे आयोजिते कार्यक्रमे भाषणं कुर्वन्ती वित्तमन्त्रिणा उक्तं यत् डीज़ल-पेट्रोल-उत्पादशुल्कयोः न्यूनी-करणेन एकलक्षकोटि-रूप्यकाणां राजस्वस्य उपरि प्रभावः भविष्यति। सा प्रधानमन्त्रिणः नरेन्द्रमोदिनः परोपकारस्य प्रार्थनायाः अनन्तरं निन्दकेषु वाक्प्रहारं कृतवती, सा उक्तवती यत् भारते भयस्य उत्प्रेषणं कर्तुं न शक्यते।

# हिमाचलस्य सर्वकारीय-विद्यालयाः देशे सर्वश्रेष्ठत्वेन निर्मास्यन्ते : मुख्यमन्त्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना नूतन-स्तरोन्नत-'सीबीएसई'-राजकीय-वरिष्ठ-माध्यमिक-विद्यालये (छोटा शिमला) छात्रैः सह संवादः कृतः। संवादकाले मुख्यमन्त्री छात्राणां प्रश्नानां सारल्येन उत्तराणि दत्तवान्। मुख्यमन्त्रिणा कथितं यत् राज्यसर्वकारेण शिक्षाव्यवस्थायां व्यापकस्तरे परिवर्तनानि विहितानि, येषां सकारात्मकाः परिणामाः सम्मुखं आयान्ति। तेन उक्तं यत् सः अत्र भाषणं दातुं न, अपितु छात्रैः सह वार्तालापं कर्तुं समायातः, येन शिक्षाव्यवस्थायाः त्रुटीनां परिचयं कृत्वा ताः प्रभाविरूपेण दूरीकर्तुं शक्येरन्। वर्तमान-राज्यसर्वकारः हिमाचलप्रदेशस्य सर्वकारीय-विद्यालयान् देशस्य सर्वश्रेष्ठ-विद्यालयान् विधातुं दिशि कार्यं करोति, येन छात्रेभ्यः सर्वकारीय-संस्थासु गुणात्मिका शिक्षा प्राप्तुं शक्येत्। सर्वकारीय-विद्यालयानां शिक्षकाः अतीव सक्षमाः, शश्रमकाश्च भवन्ति, तेषां नियुक्तिश्च प्रतिस्पर्धात्मक-परीक्षाणां (प्रतियोगी परीक्षाओं) माध्यमेन भवति।संवादकाले छात्रैः 'सीबीएसई'-प्रणालीतः आरभ्य मुख्यमन्त्रिणः व्यक्तिगत-अनुभवानां सम्बद्धाः बहवः प्रश्नाः पृष्टाः। छात्रेण आरवठाकुरेण तस्य विद्यालयीय-दिनानां प्रियक्रीडा-विषये पृष्टम्। मुख्यमन्त्रिणा विज्ञापितं यत् सः वाद-विवाद-प्रतिस्पर्धासु सक्रियरूपेण भागं गृह्णाति स्म तथा हॉकी, क्रिकेट्, हैण्डबॉल् च खेलति स्म। तेन उक्तं यत् सः हैण्डबॉल्-दलस्य नायकः (कप्तान) अपि आसीत् तथा तस्य 'ट्रैकिंग' (पर्वत-शैल-भ्रमणं) इत्यस्य अपि व्यसनम् (रूचिः) आसीत्। तेन कथितं यत् तस्य प्रथमा 'ट्रैकिंग'-यात्रा टापरी-तः रिकांगपिओ-पर्यन्तम् आसीत्।

विद्यालयस्य एकेन छात्रेण विज्ञापितं यत् वर्तमाने भौतिकविज्ञान-विषयस्य शिक्षकाः न सन्ति तथा राजनीतिविज्ञानस्यापि केवलम् एकः एव शिक्षकः वर्तते। छात्रेण रिक्तानि पदानि पूरयितुं प्रार्थना कृता। अस्य प्रश्नस्य उत्तरं यच्छता मुख्यमन्त्रिणा प्रोक्तं यत् एषः विद्यालयः अधुना 'सीबीएसई'-संस्था सञ्जातः, अतः अस्मिन् वर्षे ३० जून-दिनाङ्कात् पूर्वं सर्वाणि रिक्तानि पदानि पूरयिष्यन्ते। तेन कथितं यत् अधुना छात्रेभ्यः 'सीबीएसई'-पाठ्यक्रमान्तर्गतं अधिक-विषयाणां विकल्पाः प्राप्स्यन्ते।

द्वादश-कक्षायाः छात्रेण दिव्यांशेन पृष्टं यत् वर्तमाने यदा छात्राः ८० प्रतिशततः अधिकान् अङ्कान् प्राप्नुवन्ति, तदा अङ्काः महत्त्वपूर्णाः सन्ति उत कौशलम्! मुख्यमन्त्रिणा प्रतिपादितं यत् अङ्काः महत्त्वपूर्णाः सन्ति, परन्तु छात्रैः अनेन सहैव कुशलैः सक्षम-व्यक्तिभिश्च भवितव्यम्। राज्यसर्वकारस्य नशा-निवारण-अभियाने यूनां भूमिकायाः महत्त्व-विषये पृष्टस्य प्रश्नस्य उत्तरं ददता मुख्यमन्त्रिणा कथितं यत् नशा-निवारण-अभियाने यूनां भूमिका अत्यन्तं महत्त्वपूर्णा वर्तते। नशा-व्यापारिणः (तस्कर) पूर्वं यूनः व्यसनिनः कुर्वन्ति, ततः परं तान् तस्करी-कार्ये संलग्नान् कुर्वन्ति। तेन छात्रेभ्यः आह्वानं कृतं यत् ते नशा-तस्कराणां सूचनां आरक्षकदलम् (Police) प्रति दद्युः तथा अस्याः दुष्टतायाः विरुद्धं जागरूकता-प्रसारे सक्रियाम् भूमिकां निर्वहेयुः। तेन एतदपि विज्ञापितं यत् ५ जून दिनाङ्के शिमला-नगरे 'एन्टी-चिट्टा' (नशा-विरोधिनी) रैली आयोजयिष्यते। तेन छात्रान् अस्मिन् भागं ग्रहीतुम् आह्वानं कृतम्।सप्तम-कक्षायाः छात्रा राधा मुख्यमन्त्रि-पद-प्राप्तेः तस्य जीवनयात्रा-विषये पृष्टवती। मुख्यमन्त्रिणा विज्ञापितं यत् यदा सः दशम-कक्षायाम् आसीत्, तदा तस्य विद्यालये विसंवादः (हड़ताल) अभवत्, यस्मात् परं सः १७ वर्षस्य वयसि कक्षा-प्रतिनिधिः (Class Representative) सञ्जात। हिमाचलप्रदेश-विश्वविद्यालयेशु विधिशास्त्रस्य (Law) अध्ययनकाले सः विभागीय-प्रतिनिधिः अभवत्। तदनन्तरं सः नगरनिगम-शिमलायाः पार्षदः आसीत् तथा 'एनएसयूआई' (NSUI) एवं हिमाचलप्रदेश-काङ्ग्रेस-समित्याः अध्यक्षपदे अपि कार्यं कृतवान्। संस्मरणानि स्मरन् तेन कथितं यत् तस्य भ्रातरः भगिन्यश्च आजीविका-युक्ताः आसन्, अतः तस्य पितरौ प्रायः तं राजनीतिं त्यक्त्वा जीविकां कर्तुं परामर्शं यच्छतः स्म। तेन विज्ञापितं यत् आरम्भे तस्य इच्छा शिमला-तः निर्वाचनं स्पर्धयितुम् आसीत्, परन्तु परिस्थिति-कारणात् तस्मै नादौन-विधानसभा-क्षेत्रतः आवेदन-पत्रं (टिकट) प्राप्तम्।

छात्रेभ्यः सफलतायाः मूलमन्त्रं ददता मुख्यमन्त्रिणा प्रोक्तं यत्— "जीवने सफलीभवितुम् अनुशासनं, समर्पणं, सङ्घर्ष-भावना च अत्यन्तं आवश्यकी वर्तते। स्व-लक्ष्यं प्राप्तुं निरन्तरं परिश्रमं कुर्वाणः जनः एव सफलतां अर्जितुं शक्नोति।" अस्मिन् अवसरे नगरनिगम-शिमलायाः महापौरः सुरेन्द्रचौहानः, शिक्षासचिवः राकेशकंवरः, स्कूल-शिक्षा-निदेशकः आशीषकोहली, विद्यालय-कर्मचारिणः तथा अन्ये मान्याः जनाः अपि उपस्थिताः आसन्।

# सुक्खु-सर्वकारस्य उपरि निर्वाचन-आचारसंहितायाः उल्लङ्घनस्य आरोपः, भाजपा-दलेन राज्यपालाय समर्पितं ज्ञापनं, कृताः एताः अभ्यर्थनाः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-भाजपा-दलेन सुक्खु-सर्वकारस्य उपरि निर्वाचन-आचारसंहितायाः उल्लङ्घनस्य आरोपः संस्थापितः। आचारसंहिता-उल्लङ्घनस्य उपालम्भ-पत्रं स्वीकृत्य हिमाचलप्रदेश-भाजपा-पक्षेण प्रदेशाध्यक्षस्य राजीवबिन्दलस्य नेतृत्वे राज्यपालाय एकं ज्ञापनं समर्पितम्। राज्यपालाय प्रदत्ते ज्ञापने भाजपा-दलेन आरोपं कुर्वता कथितं यत्— "सत्तापक्षः निर्वाचनप्रक्रियायाः प्रभावितीकरणाय प्रशासनिक-यन्त्राणां (मशीनरी) दुरुपयोगं कर्तुं लोकतान्त्रिक-संस्थानां च दुर्बलीकरणाय प्रयासं करोति। निर्वाचनप्रक्रियायाः मध्ये अध्यक्ष-उपाध्यक्षयोः (चेयरमैन एवं वाइस चेयरमैन) निर्वाचनानि प्रभावितं कर्तुं नियमेषु अधिसूचनासु च परिवर्तनस्य चर्चाः प्रयासाश्च लोकतन्त्रस्य मूलभावनायाः उपरि साक्षात् प्रहारः वर्तते। निर्वाचनप्रक्रियायाः आरम्भानन्तरं नियमानां परिवर्तनं न केवलं जनादेशस्य अपमानं, अपितु एतत् संविधानस्यात्मनः लोकतान्त्रिक-परम्पराणां च विपरीतं वर्तते।" याचिकायां स्पष्टतया प्रतिपादितं यत् निर्वाचितेभ्यः जनप्रतिनिधिभ्यः समये अधिकाराणाम् अप्रदानं तथा 'राजपत्र-अधिसूचना' (Gazette notification) निर्गमने विलम्बः संविधानस्य मूलभावनायाः विपरीतम् अस्ति। अनेन सहैव एतदपि कथितं यत् लोकतान्त्रिक-संस्थानां स्थाने अप्रत्यक्ष रूपेण अधिकारीणां नियन्त्रणस्य निरन्तरीकरणं संविधानस्य भाग IX-A इत्यस्य भावनायाः उल्लङ्घनं वर्तते।याचिकायाम् अग्रे उक्तं यत् आचारसंहितायाः प्रवृत्तौ सत्यामपि २२ मई २०२६ दिनाङ्के राज्यसर्वकारेण मन्त्रिमण्डलस्य (कैबिनेट) उपवेशनम् आयोजितम्। एतत् स्वयमेव गम्भीरान् प्रश्नान् जनयति। निर्वाचनप्रक्रियायाः काले एतादृशस्य मन्त्रिमण्डल-उपवेशनस्य आयोजनं तस्मिन् च मतदातॄन् प्रभावितं कुर्वताम् निर्णयानां स्वीकरणं निर्वाचन-निष्पक्षतायाः भावनायाः प्रतिकूलं वर्तते।

**मन्त्रिमण्डले सर्वकारेण स्वीकृताः एते निर्णयाः**

> 'इन्दिरा गान्धी प्यारी बहना' योजनायां परिवर्तनं विहितम्।

> लक्षद्वयात् (२ लाख) न्यूनायवन्तीभ्यः महिलाभ्यः प्रतिमासं १५०० रूप्यकाणां दानस्य निर्णयः।

> विविधेषु विभागेषु २२१५ पदानां पूरणाय स्वीकृतिः।

> 'सीबीएसई' (CBSE) विद्यालयेषु १५०० शिक्षकाणां नियुक्तेः अनुमोदनम्।

> महाविद्यालय-प्राध्यापकानां सेवानिवृत्ति-आयुः ६२ वर्षतः वर्धयित्वा ६३ वर्षं कृता।

> 'पीडब्ल्यूडी' (PWD) विभागस्य 'मल्टी टास्क' कर्मचारिणां वेतनं ५५०० रूप्यकेभ्यः वर्धयित्वा ६००० रूप्यकाणि कृतम्।

> सीवन-अध्यापिकानां (सिलाई अध्यापिकाओं) मानदेये १००० रूप्यकाणां वृद्धिः विहिता।

➢ 'हिम चण्डीगढ़' परियोजनायाः कृते अष्ट-सहस्र-



➢ (८००० बीघा) भूमिं प्रदातुं निर्णयः स्वीकृतः।

> शिक्षा-मण्डलस्य ३०० विद्यालयेषु 'सीबीएसई'-सदृशाणां सुविधानां प्रदानस्य निर्णयः।

> 'फिशिंग-रॉयल्टी' शुल्कं ७ प्रतिशततः न्यूनीकृत्य १ प्रतिशतं कर्तुं निर्णयः जातः।

> परागपुर-क्षेत्रे नूतन-'एसडीएम' (SDM) कार्यालयस्य स्वीकृतिः प्रत्ता।

> प्रशासनिक-एककानां पुनर्संरचनार्थम् एकस्य आयोगस्य गठनस्य निर्णयः स्वीकृतः।

> आयोगाय उपमण्डलानां, तहसीलानां, उपतहसीलानां, विकास-खण्डाणां च समीक्षायाः अधिकारः प्रदतः।

> प्रदेशस्य वर्तमान-प्रशासनिक-संरचनायाः— १२ जनपदाः (जिले), ८१ उपमण्डलाः, ९२ विकास-खण्डाः तथा १९३ तहसील-उपतहसीलानां समीक्षायाः निर्णयः विहितः।

> आवश्यकतानुसारं नूतन-प्रशासनिक-एककानां सङ्घटनस्य सम्भावना व्यक्ता कृता। शेषं ५ पृष्ठे...

# चतुर्थबारं पेट्रोल- डीजलमूल्यवृद्धि- कारणात् जनजीवनं प्रभावितं जातम्

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुर, बिहार।** भारतदेशे पुनरेकवारं पेट्रोल- डीजलतैलयोः मूल्यवृद्धिः अभवत्। गतदशदिनेषु एषा चतुर्थवारं वृद्धिरिति ज्ञायते। तेलविपणनसंस्थाभिः पेट्रोलेत्यस्य मूल्यं प्रति लीटरं 2.61 रूप्यकाणि, डीजलेत्यस्य च 2.71 रूप्यकाणि वर्धितानि। अस्याः मूल्यवृद्धेः प्रत्यक्षप्रभावः सामान्यजनानां जीवनस्योपरि अपि दृश्यते। परिवहनव्ययः, खाद्यवस्तूनां मूल्यं, यात्राव्ययः च निरन्तरं वर्धमानः अस्ति। विशेषज्ञाः वदन्ति यत् अमेरिका-ईरान देशयोः संघर्षकारणात् अन्ताराष्ट्रियापणे अशोधित (कच्चा) तैलस्य मूल्यानि तीव्रतया वर्धन्ते। पश्चिम- एशियाक्षेत्रे उत्पन्नः संघर्षः, तेलोत्पादनस्य न्यूनता, वैश्विकावश्यकतापूर्त्योः मध्ये असन्तुलनं च अस्य मुख्यकारणानि सन्ति। भारतस्य तैलसंस्थानानि अपि बहुहानिं वहन्ति इति सूचना वर्तते। नवीनमूल्यानुसारं देहलीनगरे पेट्रोलेत्यस्य मूल्यं प्रायः 102.12 रूप्यकाणि प्रति लीटरं जातम्, डीजलेत्यस्य च 95.20 रूप्यकाणि प्रति लीटरं जातम्। मुम्बई, कोलकाता, चेन्नै, हैदराबादादिषु महानगरेषु अपि मूल्यानि शताधिकानि सन्ति।
एतया मूल्यवृद्ध्या सर्वाधिकं कष्टं मध्यमवर्गीय- परिवाराणां, कृषकाणां, वाहनचालकानां च कृते भवति। कृषिक्षेत्रे डीजलतैलस्यस्य उपयोगः अधिकः भवति। अतः सिंचनव्ययः, धान्यपरिवहनव्ययः, कृषकाणां उत्पादनव्ययः च वर्धते। एतस्मात् कारणात् अन्नवस्तूनां मूल्येषु अपि वृद्धेः सम्भावना दृश्यते। सार्वजनिकपरिवहनव्यवस्थायामपि अस्य प्रभावः स्पष्टतया दृश्यते। बसयानानि, मालवाहनानि, टैक्सीसेवाः च मूल्यवृद्धिं कर्तुं प्रवृत्ताः सन्ति। एतेन यात्रिकाणां व्ययभारः अपि वर्धते। सामान्यजनाः वदन्ति यत् जीवनयापनं दिनप्रतिदिनं कठिनतरं भवति। अर्थशास्त्रज्ञाः कथयन्ति यत् ईंधनमूल्यवृद्धिः केवलं वाहनक्षेत्रं न प्रभावितवती, अपितु सम्पूर्णार्थव्यवस्थां प्रभावितवती। यतः सर्ववस्तूनां परिवहनं पेट्रोल- डीजलतैलाधारित- वाहनैः एव अधिकाधिकं भवति। अतः यदि ईंधनस्य मूल्यं वर्धते, तर्हि सर्ववस्तूनां मूल्येषु अपि वृद्धिः स्वाभाविकी भवति। विपक्षदलानि केन्द्रसर्वकारं लक्ष्यीकृत्य आलोचनां कुर्वन्ति। तेषां मतम् अस्ति यत् सर्वकारेण करभारः न्यूनीकर्तव्यः। यदि उत्पादशुल्कं न्यूनं क्रियेत, तर्हि सामान्यजनाः शान्तिं प्राप्नुयुः। अपरपक्षे सर्वकारपक्षीयाः वदन्ति यत् वैश्विकपरिस्थितेः कारणात् भारतदेशः बाध्यतया मूल्यवृद्धिं करोति। अधुना केचन जनाः वैकल्पिकऊर्जास्रोतांसि प्रति आकर्षिताः भवन्ति। विद्युत्चालितवाहनानां (EV) विक्रयः क्रमशः वर्धते, किन्तु विद्युदावेशन(चार्जिंग)सुविधायाः न्यूनतया तेषां व्यापकस्वीकारः अद्यापि न अभवत्। विशेषज्ञाः परामर्शं ददति यत् जनाः यथासम्भवं इंधनस्य मितव्ययतया उपयोगं कुर्वन्तु। सामूहिकयात्रा, सार्वजनिकवाहनसेवा, द्विचक्रिकाप्रयोगः इत्यादयः उपायाः उपयोगिनः स्युः। सर्वकारेण अपि दीर्घकालीनोर्जानीतिः सुदृढा करणीयेत्यपि मतं व्यक्तं भवति। समग्रतया दृष्ट्वा पेट्रोल-डीजलेत्यनयोः एषा पुनः पुनर्मूल्यवृद्धिः भारतीयजनजीवनं गम्भीरतया प्रभावितवती अस्ति। यदि शीघ्रं स्थायिसमाधानं न प्राप्येत, तर्हि महर्घता (महंगाई) अधिका भविष्यति, सामान्यजनानां आर्थिकदशा च कठिनतरा भविष्यति।

# विश्वविद्यालये सञ्चालितानां पारम्परिकविषयाणां मध्यप्रदेशलोक- सेवायोगेन सहविषयरूपेण स्वीकृतिः




**हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः।** महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य माननीयकुलगुरुणा प्रो. शिवशङ्करमिश्र महोदयेन कृतैः प्रयत्नैः मध्यप्रदेशलोकसेवायोगेन एम. ए. विशिष्टसंस्कृत/ प्राच्य, वेद, व्याकरण, साहित्य तथा दर्शनविषयेषु आचार्योपाधेः संस्कृतस्य सहविषयरूपेण स्वीकृतिः प्रदत्ता अस्ति। उल्लेखनीयम् अस्ति यत् आयोगेन पूर्वं एतेषु विषयेषु उपाधिप्राप्तानां छात्राणाम् आवेदनपत्राणि अमान्यानि घोषितानि आसन् तथा च ते साक्षात्कारप्रक्रियायां समावेशिताः न आसन्। एतेन छात्राणां आवेदनप्रक्रियायां नियुक्तिप्रक्रियायां च बहवः क्लेशाः उत्पन्नाः। एतत् प्रकरणं सञ्ज्ञानं नीत्वा माननीयकुलगुरुमहोदयेन आयोगं प्रति पत्रं प्रेष्य विषयस्य गाम्भीर्यं छात्रहितं च दृष्ट्वा सम्बन्धितसूचनाः प्रदत्ताः।
विश्वविद्यालयस्य निरन्तरप्रयत्नानन्तरम् आयोगेन एम. ए. विशिष्टसंस्कृत/ संस्कृतप्राच्य तथा आचार्योपाधिः (संस्कृतपारम्परिकविषयाः- वेदः, व्याकरणम्, दर्शनम्, साहित्यं च) संस्कृतस्य सहविषयरूपेण स्वीकृता। अनेन निर्णयेन एतासाम् उपाधीनां धारकाः छात्राः अधुना संस्कृतविषये सहायकप्राध्यापकपदस्य योग्यतां प्राप्नुयुः। आयोगस्य अयं निर्णयः विश्वविद्यालयस्य, पूर्वोपाधिधारकाणां तथा अध्ययनरतविद्यार्थिनां कृते रोजगारस्य अधिकान् अवसरान् प्रदास्यति। विश्वविद्यालयपरिवारेण अस्मिन् निर्णये हर्षः व्यक्तीकृतः तथा च एषः निर्णयः छात्रहिताय भारतीयज्ञानपरम्परायाः संरक्षणाय च महत्त्वपूर्णा उपलब्धिरिति कथितम्।

# आचार्यराधावल्लभत्रिपाठिनः विरचितस्य 'चतुष्पदी' ग्रन्थस्य लोकार्पणम्



**हिमसंस्कृतवार्ताः- डॉ. विजयकुमारः।** महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयः उज्जयिनी- देववाणी- परिषद् नवदेहली इत्यनयोः संयुक्ततत्त्वावधानेन प्रो.राधावल्लभ त्रिपाठी विरचितस्य 'चतुष्पदी' इति ग्रन्थस्य लोकार्पणं परिचर्चाकार्यक्रमश्च आयोजितः। कार्यक्रमे मुख्यातिथिरूपेण प्रो. बालकृष्णशर्म्महोदयः उपस्थितः आसीत्। तेन स्वोद्बोधने आचार्यराधावल्लभत्रिपाठिनः रचनासु निहितानां साहित्यिकसन्दर्भाणां उल्लेखः कृतः। आचार्येणोक्तं यत् आचार्यत्रिपाठिना नैकाः महत्त्वपूर्णाः कृतयः विरचिताः। उज्जयिन्यां तेषां नवीनग्रन्थस्य 'चतुष्पदी' इत्यस्य लोकार्पणं साहित्यजगतः कृते महत्त्वपूर्णा उपलब्धिरस्ति।सारस्वतातिथिरूपेण डॉ.नौनिहालगौतमः उपस्थितः आसीत्। तेन आचार्यत्रिपाठिनः संस्कृतसाधनायाः साहित्यलेखनपरम्परायाश्च विषये स्वविचाराः प्रस्तुताः। तेन तेषां प्रमुखरचनानामपि उल्लेखः कृतः। विशिष्टातिथिरूपेण डॉ. कौशलतिवारी उपस्थितः आसीत्। तेन 'चतुष्पदी' ग्रन्थस्य विस्तृतः परिचयः प्रस्तुतः। तेन उक्तं यत् अयं ग्रन्थः चतुर्षु भागेषु विभक्तः अस्ति। सभां सम्बोधयन् आचार्यः राधावल्लभत्रिपाठीवर्यः कवितापाठं कृत्वा स्वविरचितयोः'नेकचन्दस्मृतिः'- 'सत्यवतीस्तुतिः' इत्येतयोः वाचनमकरोत्। तेन उक्तं यत् एषः तस्य सप्तमः काव्यसङ्कलनग्रन्थः अस्ति। कस्यापि रचनाकारस्य स्वकार्यस्य मूल्याङ्कनस्य अधिकारः न भवति, अपितु अन्येषां विदुषां समीक्षया एव कृत्याः यथार्थमूल्याङ्कनं भवति। तेन एतदपि उक्तं यत् कवितानिर्माणम् आकस्मिकम् अव्याख्येयं च भवति। कार्यक्रमस्य अध्यक्षतां कुर्वन् विश्वविद्यालयस्य माननीयकुलगुरुः प्रो. शिवशङ्करमिश्रः आचार्यत्रिपाठिनः अभिनन्दनं कृत्वा तेषां नूतनग्रन्थस्य लोकार्पणावसरे शुभकामनाः प्रदत्तवान्। प्रो. मिश्रेण उक्तं यत् त्रिपाठीमहोदयस्य जीवनं तेषामादर्शान् प्रतिपादयति। द्विशताधिकग्रन्थानां लेखनं महनीयं कार्यम् अस्ति। सरलता तेषां व्यक्तित्वस्य प्रमुखविशेषता अस्ति। कार्यक्रमे प्रो. जगदीश शर्मा, विश्वविद्यालयस्य आचार्याः, शोधच्छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं वेदविभागाध्यक्षेन डॉ. संकल्पमिश्रेण कृतम्। स्वागतभाषणं विभागसमन्वयकेन डॉ. तुलसीदासपरौहेण प्रस्तुतं तथा धन्यवादज्ञापनं ज्योतिषविभागाध्यक्षेन डॉ.उपेन्द्रभार्गवेण कृतम्।

# भागलपुरनगरे गङ्गादशहरामहोत्सवः सम्पन्नो



**हिमसंस्कृतवार्ताः- डॉ विमलेशझा, भागलपुर, बिहार**

बिहारराज्यस्य भागलपुरनगरस्य पावनगङ्गातटेषु गङ्गादशहरापर्वणः अवसरः अत्यन्तं भक्तिमयः उल्लासपूर्णश्च आसीत्। प्रातःकालादेव नगरस्य बरारीघट्टे, बूढानाथघट्टे, आदमपुरघट्टे, कुप्पाघट्टे च सहस्रशः श्रद्धालवः समागत्य श्रद्धाभक्तिपूर्वकं गङ्गास्नानं कृतवन्तः। सम्पूर्णं क्षेत्रं वैदिकमन्त्रैः, घण्टानिनादैः, “हर हर गङ्गे”, “जय गङ्गे माता” इत्यादि जयघोषैः च गुंजितमभवत्। उषसः आरभ्य एव महिलाः, वृद्धाः, युवाः, बालकाः, साधुसन्तश्च गङ्गातटेषु दीर्घपङ्क्तिषु स्थित्वा स्नानस्य प्रतीक्षां कुर्वन्तः दृश्यन्ते स्म। अनेके भक्ताः पवित्रगङ्गाजलं गृहं नेतुं कलशान् पूरितवन्तः। स्नानानन्तरं श्रद्धालवः दीपदानं, फलपुष्पसमर्पणं, आरतीं, गङ्गास्तोत्रपाठं च कृतवन्तः। अनेकस्थलेषु भजन- कीर्तन- धार्मिकप्रवचनानामपि आयोजनम् अभवत्। विशेषतया ऐतिहासिक- बूढानाथ- मन्दिरपरिसरे भक्तानां विशालः समागमः अभवत्। तत्र भक्ताः भगवन्तं शिवं पूजयित्वा गङ्गामातुः आराधनां कृतवन्तः। महिलाभिः समूहगायनरूपेण गङ्गामहिम्नः गीतानि गायतः वातावरणं भक्तिरसमयं कृतम्। बालकाः अपि लघुध्वजान् वहन्तः “गङ्गामाता की जय” इति घोषं कुर्वन्तः उत्साहं प्रकटितवन्तः।

## पौराणिकं धार्मिकं च महत्त्वम्-

धार्मिकग्रन्थानुसारं ज्येष्ठमासस्य शुक्लपक्षस्य दशमीतिथौ स्वर्गलोकात् भूमण्डले गङ्गायाः अवतरणम् अभवत्। पुराणेषु वर्णितम् अस्ति यत् राजा भगीरथः स्वपूर्वजानां मोक्षप्राप्त्यर्थं दीर्घकालं कठोरं तपः अकरोत्। तस्य अनन्यतपसः प्रभावेण ब्रह्मा प्रसन्नो जातः, ततः तेन गङ्गायाः भुवि अवतरणस्य अनुमतिः प्रदत्ता। परन्तु गङ्गायाः प्रचण्डवेगं धारयितुं केवलं भगवान् शिवः समर्थः आसीत्। अतः भगवान् शंकरः तां स्वजटासु धारयित्वा शनैः पृथिव्यां प्रवाहितवान्। एषा कथा भारतीयसंस्कृतेः श्रद्धायाः, तपस्यायाः, लोककल्याणभावनायाः च अद्वितीयं प्रतीकं मन्यते। विश्वासः अस्ति यत् गङ्गादशहरादिने गङ्गास्नानं, दानं, जपः, तपः, पूजनं च कृत्वा मनुष्यस्य दशविधानि पापानि नश्यन्ति। अतः बिहारराज्यस्य विभिन्नेभ्यः जनपदेभ्यः अपि भक्ताः भागलपुरं प्राप्य गङ्गास्नानस्य पुण्यलाभं प्राप्तवन्तः। गङ्गादशहरापर्वणः पूर्वमेव नगरनिगमेन प्रशासनस्य च सहयोगेन सर्वेषु घट्टेषु विशेषस्वच्छताभियानं सञ्चालितम्। घाटमार्गेषु प्रकाशव्यवस्था, पेयजलव्यवस्था, अस्थायी शौचालयव्यवस्था च कृता। विविधेषु स्थानेषु चिकित्साशिविराणि अपि स्थापितानि यत्र चिकित्सकाः औषधानि च उपलब्धानि आसन्। जनैःघट्टेषु रंगोलीचित्राणि, ध्वजपताकाः, पुष्पसज्जा च कृत्वा सम्पूर्णं वातावरणं उत्सवमयं निर्मितम्। अनेकाः सामाजिकसंस्थाः अपि स्वयंस्फूर्त्या श्रद्धालूनां साहाय्यं कुर्वन्त्यः दृश्यन्ते स्म। केचन संस्थासदस्याः निःशुल्कं शीतलं जलं, मधुरजलं, प्रसादं च वितरन्तः आसन्।

जनसमूहस्य विशालतां दृष्ट्वा प्रशासनं विशेषसतर्कताम् अवलम्बितवान्। विभिन्नघट्टेषु आरक्षीबलस्य व्यापकव्यवस्था कृता आसीत्।जलेवाहदलानि, आपत्कालीननौकाः, चिकित्सकदलानि च सर्वत्र तत्पराः आसन्। जिलाधिकारी, वरिष्ठआरक्षी अधिकारिणः, नगरप्रशासनस्य अधिकारिणश्च निरन्तरं घट्टेषु निरीक्षणं कुर्वन्तः दृश्यन्ते स्म। उद्घोषणायन्त्रैः श्रद्धालूनां कृते सावधानतासन्देशाः अपि प्रसारिताः। विशेषतया बालकानां वृद्धानां च सुरक्षायै पृथक् व्यवस्था कृता आसीत्।

## स्थानीयश्रद्धालुः आशीषकुमारदासः अवदत्-


“गङ्गामाता केवलं नदी नास्ति, सा अस्माकं संस्कृतेः जीवनस्य च आधारः अस्ति। गङ्गास्नानेन आत्मिकशान्तिः प्राप्यते, मनसि नवचेतना जागरिता भवति। वयं स्वकुटुम्बस्य सुखसमृद्ध्यर्थं, समाजस्य सौहार्दाय, राष्ट्रस्य उन्नत्यै च प्रार्थनामः।”

अन्यश्रद्धालुः अवदत्- “प्रतिवर्षं वयं परिवारसहितं गङ्गादशहरापर्वणि स्नानार्थम् आगच्छामः। अस्मिन् पर्वणि आध्यात्मिकानन्दस्य अद्भुतानुभूतिः भवति।” अस्मिन् अवसरे अनेकाभिः सामाजिकसंस्थाभिः गङ्गास्वच्छतायाः विषये जनजागरूकताऽपि क्रियते। स्वयंसेवकाः श्रद्धालून् प्लास्टिकपदार्थान् गङ्गायां न क्षेप्तुम् अनुरोधं कृतवन्तः। “स्वच्छगङ्गा-निर्मलगङ्गा” इति अभियानस्य अन्तर्गतं जनाः पर्यावरणसंरक्षणस्य शपथम् अपि स्वीकृतवन्तः। इत्थं गङ्गादशहरामहोत्सवः न केवलं धार्मिकआस्थायाः प्रतीकः, अपि तु भारतीयसंस्कृतेः, सामाजिकैकतायाः, पर्यावरणसंरक्षणस्य च प्रेरणास्रोतोरूपेण सम्पन्नः अभवत्।

# बिलासपुरस्य 'टाली'-पञ्चायते प्रधान-पदस्य निर्वाचनं निरस्तम्

हिमसंस्कृतवार्ताः - बिलासपुरम्। राज्य-निर्वाचन-आयोगेन हिमाचलप्रदेशस्य बिलासपुर-जनपदस्य 'श्री नयनादेवी जी' विकास-खण्डे (ब्लॉक) स्थितस्य 'टाली' ग्रामपञ्चायतस्य प्रधान-पदस्य निर्वाचनं निरस्तं विहितम्। उल्लेखनीयं वर्तते यत् जनपद-निर्वाचन-अधिकारिणा तथा उपायुक्तेन (बिलासपुरम्) आयोगः सूचितः आसीत् यत् अस्यां ग्रामपञ्चायते एका अङ्गनबाडी-कार्यकर्त्री (आंगनबाड़ी कार्यकर्ता) अपरा च 'मिड-डे-मील'-कर्मचारिणी निर्वाचनं स्पर्धयन्त्यौ आस्ताम्; तथा च नामांकन-पत्राणाम् अन्वेषण-काले (स्क्रूटनी) कस्यापि प्रत्याशिनः पक्षतः सहायक-'रिटर्निंग'-अधिकारिणः सम्मुखम् अस्मिन् विषये कापि आपत्तिः न उत्थापिता आसीत्।

अतः सहायक-'रिटर्निंग'-अधिकारिणा तथ्यानाम् अभावात् ताभ्यां निर्वाचन-चिह्नानि आबंटितानि (प्रदत्तानि) आसन्। अधुना केचन प्रत्याशिनः 'रिटर्निंग'-अधिकारिणं तथा जनपद-निर्वाचन-अधिकारिणं प्रति उपालम्भ-पत्रिकां प्रेषितवन्तः, यस्य आधारेण आयोगेन पञ्चायत-प्रधान-पदस्य निर्वाचनम् आगामि-आदेशं यावत् निरस्तं कृतम् अस्ति। अनेन सहैव आयोगेन स्पष्टीकृतं यत् अस्मिन् पञ्चायते अन्यानां सर्वेषां पदानां निर्वाचनं पूर्व-निर्धारित-कार्यक्रमानुसारमेव विधास्यते।



# विनोदकणिका

भर्तुः दुर्भावे (Mood), भार्यायाः दुर्भावे च किं भेदः?
भर्तुः दुर्भावः सरलज्वर इव भवति। सः स्वयमेव तत् अनुभवति। परन्तु भार्यायाः दुर्भावः कोरोना इव अस्ति। यः कोऽपि तस्य सम्पर्कं प्राप्नोति सः सर्वैः प्रभावितः भवति।
😑 😡 😳 🤪

{२} वनविभागाय आवेदनपत्रं प्राप्तम्- मम गृहस्य सिंहिका 🦁 विरूद्धं कार्यं कर्तुं शक्यते वा?
वनविभागात् उत्तरं प्राप्तम्- यदा सिंहिका आनीता तदा NOC स्विकृतम् वा???
आवेदकस्य उत्तरम् आसीत्- अहं तु 🐐 अजा आनीता आसम्। सा कदा सिंहिका अभवम् इति न अवगच्छामि स्म।
🤪 😂 😎 🤔

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# हास परिहासम्

**डॉ.विदुषी अग्रवालः**

यदि पत्नी वदति 'यत् रोचते तत् कुरु' इति, तस्य अर्थः एषः न भवति यत् भवान् किमपि कर्तुं शक्नोति।
तस्य अर्थः तु एषः भवति यत् 'यदि साहसम् अस्ति, चेत् कृत्वा दर्शयतु'।" 🤪 🤪

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। मगध-प्रान्ते द्वाभ्यां श्रमिक-मित्राभ्यां शिला छत्रक-रूपेण उत्कीर्णा। तया ग्रामस्य नूतना प्रसिद्धिः प्राप्ता।
**काव्या-** नमस्ते नन्दिनि। ताभ्याम् अतीव सुन्दरं कार्यं कृतम्। इदानीं हृषीकेश-नगरस्य वार्ता। एकस्य वैदेशिकस्य स्यूतः नष्टः। आरक्षकैः स्यूतः शीघ्रं प्राप्तः प्रत्यर्पितः च। किन्तु स्थानिकाः वदन्ति यत् आरक्षकैः स्थानिकानां साहाय्यं कदापि न क्रियते, आरक्षकाः वैदेशिकस्य एव शीघ्रं साहाय्यं कृतवन्तः सन्ति।
**नन्दिनी**- सत्यं वदसि, आरक्षकैः एतादृशः पक्षपातः कृतः। अन्या वार्ता अस्ति। एका भारतीय-युवती चिकित्सा-प्रवेश-परीक्षायाम् अनुत्तीर्णा जाता। परं तया विदेशे श्रेष्ठ-विश्वविद्यालये जैव-प्रौद्योगिकी-विषये पदवी प्राप्ता।
**काव्या-** अहो! तया महती सफलता प्राप्ता। निराशायाः अनन्तरं धैर्यं न त्यक्तम्।
अन्तिमा वार्ता पर्वतमार्गतः अस्ति। एकेन पुरुषेण पर्यटकाः तर्जिताः, यतः तैः मार्गे अवकरः क्षिप्तः। अन्तर्जाले बहवः जनाः इमं दृश्य-खण्डं दृष्टवन्तः सन्ति।

# कुलाधिपतेः समक्षं राजभवने, पटनायां ललितनारायण-मिथिला-विश्वविद्यालयस्य कुलपतेः पीपीटी-प्रस्तुतिः प्रशंसनीया







**हिमसंस्कृतवार्ताः- राघव नाथझा, पटना।** बिहारराज्यस्य राज्यपाल- सहकुलाधिपतिः लेफ्टिनेन्ट-जनरल सैयद-अता-हसनैनः (सेवानिवृत्तः) इत्यस्य समक्षं राजभवने, पटनायां ललितनारायण-मिथिला-विश्वविद्यालयस्य, दरभङ्गास्थितस्य, कुलपतिना प्रो. संजयकुमार- चौधरी- महोदयेन कृतं पीपीटी-प्रस्तुतीकरणम् अत्यन्तं प्रशंसनीयम् अभवत्। अस्मिन् प्रस्तुतीकरणे विश्वविद्यालयस्य डिजिटल- प्रशासन-प्रगतिः, शैक्षणिकसुधाराः, प्रशासनिक- उन्नयन-योजनाश्च प्रस्तुताः।

परम्परागत- विश्वविद्यालयेषु डिजिलॉकर- व्यवस्थायां पदवीपत्राणाम् अपलोडीकरणे ललितनारायण-मिथिलाविश्वविद्यालयः बिहारराज्ये प्रथमस्थानं प्राप्तवान्, समर्थ-मॉड्यूल-प्रवर्तने च द्वितीयस्थानं प्राप्तवान्।

विश्वविद्यालयेन चत्वारः नूतन- प्रशासनिक- शैक्षणिक-मॉड्यूलाः प्रस्ताविताः-(१) एकेडेमिक-मॉड्यूल (२) थीसिस-प्रबन्धन-मॉड्यूल(३) बजट-मॉड्यूल(४) स्टेट-मॉड्यूलएतेषां माध्यमेन विश्वविद्यालय-प्रशासनं अधिकं पारदर्शि, दक्षं, परिणाममुखं च भविष्यति इति अपेक्षा व्यक्ता।नैक-मूल्याङ्कनस्य तृतीय-चक्रे 'बी-प्लस-प्लस' (B++) इति श्रेणीं प्राप्तवता अनेन विश्वविद्यालयेन बिहारराज्यस्य परम्परागत-विश्वविद्यालयेषु विशिष्टा उपलब्धिः प्राप्ता, या कुलाधिपतिना विशेषतया प्रशंसिता।उच्चशिक्षायां गुणवत्तावर्धनार्थं शिक्षक- छात्र-अनुपातस्य यूजीसी-मानदण्डानुसारं समायोजनाय विश्वविद्यालयेन निवेदनं कृतम्। तदनुसारं कुलाधिपतिना उच्चशिक्षा-निदेशकाय प्रो. एन. के. अग्रवालाय आदेशः दत्तः यत् शिक्षक-नियुक्तयः शीघ्रं क्रियन्तां, भौतिक-संरचना सुदृढा क्रियताम्, येन उच्चशिक्षायाः गुणवत्ता वर्धेत।विश्वविद्यालयेन इदम् सूचितम् यत् अद्यावधि एकादश-लक्षाधिकानि (११,००,०००+) पदवी- पत्राणि डिजिलॉकर-माध्यमेन अपलोड-कृतानि सन्ति। कुलाधिपतिना एतत् कार्यं प्रशंस्य निर्देशः दत्तः यत् २०२०-पूर्वकालीनानि सर्वाणि पदवी- पत्राणि अपि क्रमबद्धरूपेण अपलोड-कर्तव्यानि।

प्रस्तुतीकरणे नवस्थापित- राजकीय- डिग्री-महाविद्यालयानां समस्याः अपि निवेदिताः। विश्वविद्यालयेन स्नातकोत्तर-स्तरे यूजीसी-पाठ्यक्रमानुसारं द्विवार्षिक- एकवार्षिक- पाठ्यक्रमयोः २०२६-वर्षात् कार्यान्वयनाय आग्रहः कृतः।

कुलाधिपतिना विश्वविद्यालयस्य परीक्षा-व्यवस्था, समये उपयोगिता-प्रमाणपत्र-प्रेषण-व्यवस्था च प्रशंसिता। तेन विदेश-भाषा-कार्यक्रमे अन्य- विदेश- भाषाणां समावेशाय सुझावः दत्तः, येन छात्राणां रोजगार-सम्भावनाः वर्धेरन्। तथा एन. सी. सी. कार्यक्रमे कैडेट-छात्राणां 'बी' तथा 'सी' प्रमाणपत्र-प्राप्तीनां सेना-राज्य-प्रहरी-सेवायां योगदानस्य अभिलेखनाय निर्देशः दत्तः।

अस्मिन् अवसरे कुलपति- प्रो. संजयकुमार-चौधरी, वित्तीय-परामर्शी सह वित्तपदाधिकारी इन्द्रकुमारः, कुलसचिवा डॉ. दिव्या-रानी-हंसदा, आईक्यूएसी-निदेशकः डॉ. मो. ज्या हैदर, परीक्षा-नियन्त्रकः डॉ. इंसान अली, सी. एम. महाविद्यालयस्य प्राचार्यः प्रो. मुश्ताक अहमदः, यू. आर. महाविद्यालयः रोसरा-प्राचार्यः प्रो. संजय झा, कुलपति-सचिवः डॉ. सैयद मो. जमाल अशरफः, आईटी- सेल प्रभारी इ. गणेशकुमारपासवानः च उपस्थिताः आसन्।

अस्मिन्नेव अवसरे प्रो. मुश्ताक अहमदेन स्वसंपादितस्य शोध-पत्रिकायाः "जहाने उर्दू" इति ग्रन्थस्य शततम-विशेषाङ्कस्य द्विखण्डात्मक- प्रकाशनस्य प्रतिकृति कुलाधिपतेः समर्पिता, या अपि विशेषतया प्रशंसिता।

## सुक्खु-सर्वकारस्य उपरि निर्वाचन-आचारसंहितायाः उल्लङ्घनस्य आरोपः

तृतीयपृष्टादग्रे...

भाजपा-दलेन ज्ञापन-माध्यमेन राज्यपालः कथितः यत् सर्वकारेण स्वीकृताः एते सर्वे निर्णयाः साक्षात् मतदातॄन्, कर्मचारिणः, महिलाः, यूनः, विविधानां वर्गाणां च जनान् प्रभावितान् कुर्वन्तः सन्ति। निर्वाचनप्रक्रियायाः काले नियुक्तिः, मानदेय-वृद्धिः, प्रशासनिक-एककानां सङ्घटनम्, नूतन-घोषणाः वित्तीय-लाभानां च निर्णयाः निर्वाचन-आचारसंहितायाः भावनायाः विपरीताः सन्ति। अनेन एतत् स्पष्टतया प्रतीयते यत् निर्वाचन-लाभं प्राप्तुं उद्देश्येन योजनाबद्धरूपेण एताः घोषणाः विहिताः, येन मतदातॄन् भ्रमितान् कर्तुं शक्येत।

भाजपा-पक्षेण प्रतिपादितं यत् वर्तमान-परिस्थितिषु प्रदेशस्य लोकतान्त्रिक-व्यवस्था निर्वाचन-निष्पक्षता च गम्भीर-आह्वानस्य सामनं कुरुतः। भाजपा लोकतन्त्रस्य, संविधानस्य, स्वतन्त्र-निर्वाचन-प्रक्रियायाः च रक्षणार्थं पूर्णरूपेण प्रतिबद्धा वर्तते। अतः भाजपा भवतः सेवायां एताः अभ्यर्थना (Demands) उपस्थापयति—

१. निर्वाचन-आचारसंहितायाः प्रवृत्तिकाले आयोजितायाः मन्त्रिमण्डल-सभायाः तस्याः निर्णयानां च सद्यः संविधानात्मिका प्रशासनिकी च समीक्षा कारणीया।

२. निर्वाचनप्रक्रियायाः समाप्तिं यावत् एतादृशानां सर्वेषां निर्णयानां, घोषणानां, अधिसूचनानां च कार्यान्वयनस्य उपरि तत्कालं स्थगनं प्रदातव्यम्।

३. निर्वाचनप्रक्रियायाः काले नियमेषु अधिसूचनासु च परिवर्तनं कृत्वा निर्वाचनपरिणामान् प्रभावितं कर्तुं प्रयासानां न्यायिकं प्रशासनिकं च अन्वेषणं कारणीया।

४. निर्वाचनप्रक्रियायाः प्रभावितीकरणाय सर्वकारीय-यन्त्राणां प्रशासनिक-संसाधनानां च उपयोगस्य स्वतन्त्रं निष्पक्षं च गवेषणं भवेत्।

५. निर्वाचितानां जनप्रतिनिधीनां प्रभावितीकरणस्य, प्रभावानयनस्य तथा लोकतान्त्रिकप्रक्रियायाः दुर्बलीकरणस्य प्रकरणानां निष्पक्षं समीक्षणं कारणीया।

६. उच्चन्यायालय-सर्वोच्चन्यायालयाभ्यां (High Court & Supreme Court) प्रदत्तानां दिशा-निर्देशानां पूर्णतः पालनं सुनिश्चितं विधातुं निर्देशः प्रदातव्यः।

७. नगरनिकाय-पञ्चायतीराज-निर्वाचनानि पूर्णतः स्वतन्त्रे, निष्पक्षे, पारदर्शिनि च वातावरणे सम्पन्नं विधातुम् आवश्यकाः निर्देशाः करणीयाः।

८. निर्वाचनानि प्रभावितुं उद्देश्येन कृताः घोषणाः निर्णयाश्च सद्यः प्रभावतः निरस्ताः (Cancel) करणीयाः।



## राज्यपालेन कवीन्द्रगुप्तेन सह मुख्यमन्त्रिणः सुक्खुनः शिष्टाचार-मेलनम्

हिमसंस्कृतवार्ताः -शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना अद्य लोकभवने राज्यपालेन कवीन्द्रगुप्तेन सह शिष्टाचार-मेलनं कृतम्। अस्मिन् अवसरे मुख्यमन्त्रिणा राज्यपालेन च हिमाचलप्रदेशे विकास-जनकल्याण-सम्बद्धेषु विविधेषु विषयेषु विचार-विमर्शः विहितः। उपवेशनस्य काले सुशासनं, जनकल्याणं तथा प्रदेशे कार्यान्विताः जायमानाः विकासात्मिकाः प्रवृत्तयः (विकासात्मक पहल) आधृत्य अपि संवादः सञ्जातः। अस्मिन् अवसरे मुख्यमन्त्रिणा राज्यपालाय हिमाचली-टोपिका शॉल-वस्त्रं च प्रदाय सत्कारः कृतः।